International Journal of Sanskrit Research
अनन्ता

**ISSN: 2394-7519**
IJSR 2018; 4(1): 135-136
© 2018 IJSR
www.anantaajournal.com
Received: 21-11-2017
Accepted: 27-12-2017

**डॉ. गोपाल कुमार झा**
सिसवार, फूलपराश, मधुबनी, बिहार, भारत

**Corresponding Author:**
**डॉ. गोपाल कुमार झा**
सिसवार, फूलपराश, मधुबनी, बिहार, भारत

# शिरसि शिखाया-अनिवार्यता

**डॉ. गोपाल कुमार झा**

**प्रस्तावना**
सनातनधर्मावलम्बिनां कृते शिखायाः महत्तवमतीवावश्यकमस्ति। शिखां विनां तु सत्कर्मानुष्ठानं कथमपि नैव सिद्ध्यति। अतएवोक्तं वेदव्यासेन यत्-

विना यच्छिखया कर्म विना यज्ञोपवीतकम्।
राक्षसं तद्धि विज्ञेयं समस्ता निष्फला क्रिया। [1]

यतो हि मनुष्याः सत्कर्म तु बलवीर्य-तेजः पराक्रमादीनां कृते कुर्वन्ति। तत्र हि शिखायां सह एतेषां बलवीर्यादीनां कश्चित् अभिन्नः सम्बन्धः,अतः शिखाया आवश्यकता शिरसि वत्र्तत एव। यथा हि सैनिकानां कृते सैन्योचितं वस्त्रं वीरतां सूचयति, यवनानां कृते तेषां श्मश्रु यवनत्वं परिज्ञापयति, ईशाईधर्मावलम्बिनां कृते ईशाईस्तवनम्, तथैव हिन्दूनां कृते शिखावत्वं हिन्दुत्वं प्रकाषयति। आधुनिक-वैज्ञानिका अपि भूयोभूयः इदमित्थम् आमनन्ति यत्-यथा टेलीविजन इत्यस्य वेभ ट्रान्समीटर इव शिखा शिरसि सुशोभते। वस्तुतस्तु अस्माकं महर्षयः अनुसंधानं कृतवन्तः यत् शिखाया अधः स्थितभागस्तु ब्रह्मरन्ध्र इत्याख्यायते। ब्रह्मरन्ध्रस्योपरि भागे सहस्रदलकमले अमृतरूपब्रह्मस्थानमस्ति। विधिपूर्वकं वेदादिस्वाध्यायात् ब्रह्मरन्ध्र इत्याख्यायते। ब्रह्मरन्ध्रस्योपरि भागे सहस्रदलकमले अमृतरूपब्रह्मस्थानमस्ति। विधिपूर्वकं वेदादिस्वाध्यायात् उद्भूतम् अमृतत्वम् अतिक्रान्तवायुवेगेन सह सहस्रदल-कर्णिकायां प्रविशति तथा च अमृतत्वं शिरसः उद्धृत्य ऋग्वजुः सामस्वरूपसहस्ररश्मिः सूर्ये तादात्म्यकामोत्सुको भवति। परन्तु बद्धशिखामुद्धेतुं नैव शक्नोति। अतः कर्मानुष्ठानकाल सर्वदा शिखाबन्धनं श्रेयस्करमिति, नो चेत्तर्हि कदापि नूनमेव दुर्घटना भवितुं शक्यते। एतदर्थम मनुनोक्तम् यत्-

स्नाने दाने जपे होमे सन्ध्यायां देवतार्चने।
शिखाग्रन्थिं सदा कुर्यादित्येतन्मनुरब्रवीत्।। [2]

पूर्वोक्तं विद्यत एव यत् शिखाया निम्नतले ब्रह्मरन्ध्रमिति, तस्योपरि सहस्रदलकमले परमात्मकेन्द्रस्थानमस्ति, तत एव आत्मबोधः प्रादुर्भवति, यथाहि कुम्भक-रेचक-पूरकप्राणायामद्वारा तत् ब्रह्मरन्ध्रस्थानम् स्थिरीक्रियते। यथा च "एनटीना" सुदूरदेशतः घटितघटनां प्रदर्शयति तथैव शिरसि स्थिता शिखा अस्मान् उपकरोति, यतोहि आधुनिक वैज्ञानिकास्तु अनुसंधानं कृतवन्तः यत् ब्रह्मरन्ध्रस्य पृष्ठभागे, अर्थात् मस्तिष्के कामोत्तेजिका शक्तिरस्ति। एतदर्थं तत्र हि गोचरप्रमाणीकृतशिखा यदि बद्धा स्यात् अनुस्वारवत् तदा आत्म शक्तिः सुरक्षिता भवति। तथा च कामोद्रेकचिन्ता-शक्तिः शान्ता भवति। यतोहि जनाः शिखां संधार्य कामोद्रेकशक्तिं स्थिरीकृत्य आध्यात्मिकजगति उत्तरोत्तरं परविर्द्धन्ते। अपि च ब्रह्मलोकात् यथेष्टशक्तिमाकर्षन्ति। विषयेस्मिन् कात्यायनेनोक्तं यत् सविधि मन्त्रोच्चारणकाले कर्मानुष्ठानसमये च बद्धशिखाः

शिखां छिन्दन्ति ये मोहाद् द्वेषादज्ञानतोऽपि वा।
तप्तकृच्छ्रेण शुद्ध्यन्ति त्रयो वर्णाः द्विजातयः।। [3]

विषयेऽस्मिन् निर्णयसिन्धावुक्तं यत् तासां मध्ये शिखावर्जनमुपनयने वपनं कार्यं, प्रमादात् निःशिखं वपनं स्यात् तत्र हि कौशीं शिखां ब्रह्मग्रस्थि समन्वितां दक्षिणकर्णोपरि आशिखाबन्धाद् दधत्तिष्ठेत्। खल्वाटोऽपि कर्मसमये कुशमयीं शिखां प्रकुर्वीत। एतावता शिखाया अनिवार्यता सर्वविधकल्याणाय प्रवर्धनाय च क्रियते।

14. स किंसखा साधु न शास्ति योऽधिपम्।
15. याच्ञ मोघा वरमधिगुणे नाधमे लब्धकामा।
16. दुर्जनः परिहर्तव्यो विद्ययाऽलंकृतोऽपि सन्।
17. विद्या नाम नरस्य रूपमधिकम्।
18. मा ब्रूहि दीनं वचः।
19. क्रियासिद्धिः सत्तवे भवति महतां नोपकरणे।
20. विद्याहीना न शोभन्ते निर्गन्धा इव किंशुकाः।
21. उद्यमेन हि सिद्धयन्ति कार्यणि न मनोरथैः।
22. मनः पूतं समाचरेत्।
23. क्षणशः कणश्चैव विद्यामर्थं च चिन्तयेत्।

स्यु, नोचेत्तर्हि कर्मानुष्ठानात् उद्भूतं सूर्यलोके निश्चप्रचम् गमिष्यतीति। यथोक्तं मनुना-

सदोपवीतिना भाव्यं सदाबद्धशिखेन च।
विशिखो व्युपवीतश्च यत्करोति न तत्कृतम्। [4]

आधिदैविकदृष्ट्यापि शिखायाः महत्तवं वरीवत्र्ति यत् प्रत्येकेषु प्राणशक्तिरस्ति। अनया प्राणशक्त्या दैवशक्त्या वा परिव्याप्य स्थावरजंगमात्मकजगति जनाः पूर्वजन्मार्जितफलमत्र प्राप्नुवन्ति। ब्रह्माण्डोऽयं पिण्डशरीरे छायारूपेण व्यवस्थितो विद्यते। अतएव लतावृक्षादयश्च मन्ये तावत् अस्माकं पूर्वजाः शक्नुवन्ति। मानवाः पूर्वजन्मनि कृतं कर्म एवास्मिन् लोके प्राप्नुवन्ति। अस्य उद्भिज्जसंसारस्य चित्रम् अस्माकं शिरसि शिखा दृश्यते। शिखेयं कदापि अमृतेन सह संघर्षं करोति यथाहि-

लतागुल्मेषु वृक्षेषु पितरो ये व्यवस्थिताः।
ते सर्वे तृप्तिमायान्तु मयोत्सृष्टैः शिखोदकैः।। [5]

अतः शिखायाः कत्र्तनं नोचितमिति प्रतीयते। ये मोहात् शिखां छिन्दन्ति ते तु तप्तकृच्छोण संशुद्धाः भवन्ति। यथोक्तम्-

शिखां छिन्दन्ति ये मोहाद् द्वेषादज्ञानतोऽपि वा।
तप्तकृच्छ्रेण शुद्ध्यन्ति त्रयो वर्णाः द्विजातयः।। [6]

**संदर्भ**


1. क्रिया ।। 1 पुराणपर्यालोचनम् ।
2. वव्रीत् ।। 2 मनुस्मृतिः ।
3. तत्कृतम् ।। 3 मनुस्मृतिः-5/36।
4. कर्मसमुच्चयः
5. निर्णयसिन्धुः ।
6. मनुस्मृतिः ।